# संस्कृत-वार्ता:

**दिनाङ्क:-24.08.2024**

**प्रात: - 06 : 55**

**प्रधानमन्त्री-यूक्रेनयात्रा**

ह्यः युक्रेन्-देशस्य कीव्-नगरे प्रधानमन्त्रिणा नरेन्द्रमोदिना युक्रेन्-देशस्य राष्ट्रपतिना वोलोडिमिर् ज़ेलेन्स्की इत्यनेन सह प्रतिनिधिस्तरीयसम्मेलनं कृतम्। उभयो : नेत्रयो: उपस्थितौ चतुर्षु सहभागिता ज्ञापन पत्रेषु हस्ताक्षराणि आदानप्रदानानि च जतानी। युक्रेन्-देशे सामुदायिकविकासपरियोजना- मादकद्रव्य- नियन्त्रणमानक-, सांस्कृतिक- इत्यादिशु विविधक्षेत्रेषु द्वैपाक्षिकसंबन्धान् सुदृढं कर्तुं ज्ञापन पत्रेषु हस्ताक्षराणि कृतानि। प्रधानमन्त्री नरेन्द्रमोदी पौलैण्डयूक्रेन-देशयो: द्विदिवसीय-यात्राया: द्वितीये अन्तिमे च चरणे ह्यः कीवनगरं प्राप्तवान्। अत्रावसरे प्रधानमन्त्री श्रीमोदी कीव इत्यत्र यूक्रेनस्य राष्ट्रिय-इतिहास-संग्रहालये बालेभ्य: निर्मितां मल्टिमीडिया-माटिरोलॉजिस्ट-प्रदर्शनीम् अवलोकितवान्। तेन सह यूक्रेनस्य राष्ट्रपति: वलोडिमिर-जेलेंस्की इत्येष: आसीत्।

प्रधानमन्त्री नरेन्द्रमोदी सबलं प्रतिपादितवान् यत् युक्रेन-रूसयोः राष्ट्रद्वयोः मध्ये जायमानस्य संघर्षस्य समाधानार्थं उपाया: अन्वेस्टीतव्या: । सः आश्वासनं प्रदत्तवान् यत् भारतं शान्ति स्थापयितुं आवश्यकेषु सर्वेषु प्रयासेषु सक्रियभूमिकां निभालयितुं सज्जम् अस्ति। युक्रेनदेशस्य राष्ट्रपतिना वोलोडिमिर् जेलेन्स्की इत्यनेन सह मिलित्वा श्रीमोदी अवदत् यत् भारतेन शान्तिप्रयासानां सक्रियरूपेण योजना कृता अस्ति तथा च अस्माकं दृष्टिकोणम् जनकेन्द्रितम् अभवत्। सः अवदत् यत् भारतं संप्रभुताया: क्षेत्रीय-अखण्डतायाः च समर्थनं करोति । रूसदेशस्य सद्यः एव संपन्नाया: यात्रायाः विषये प्रवदन् प्रधानमन्त्री अवदत् यत् सः स्पष्टतया उक्तवान् यत् कस्या: अपि समस्यायाः समाधानं युद्धक्षेत्रे कदापि न लभ्यते किन्तु समाधानं केवलं वार्ता- संवाद-, कूटनीतिमाध्यमेन एव भवति।

**राजनाथसिंह:**

रक्षामन्त्री राजनाथसिंहः गतरात्रौ अमेरिकी रक्षासचिवेन लॉयड् ऑस्टिन् इत्यनेन सह द्विपक्षीयोपवेशनं वाशिङ्गटन-नगरस्य पेंटागन-नगरे कृतवान्। तेषु द्विपक्षीयरक्षासहकार्यं, औद्योगिकसहकार्यं, क्षेत्रीयसुरक्षा इत्यादिषु अन्तर्राष्ट्रीयविषयेषु व्यापकविमर्शः अभवत् । रक्षामन्त्री राजनाथसिंह: अवोचत् यत् भारतामेरिका-देशौ स्वाभाविकौ सहयोगिनौ स्त:। अपि च द्वयोर्मध्ये सहभागित्वं सुनिश्चितमस्ति। अमरीका-देशस्य आधिकारिकयात्राया: प्रथमे दिने श्रीसिंह: वॉशिङ्गटननगरे भारतीयप्रवासिन: सम्बोधितवान्। असौ अत्रावसरे हर्षमपि अनुभूतवान्। यतो हि तत्रस्था: भारतीयसमुदाया: निज-सांस्कृतिकमूल्यै: सह योजितास्सन्ति। भारतीयार्थव्यवस्थायै विकासात्मक-सम्भावना: प्रकाशयन् श्रीसिंह न्यगादीत् यत् भारतदेश: सप्तविंशत्यधिक-द्विसहस्रतमवर्षं यावत् तृतीया बृहत्तमार्थव्यवस्था भवेदिति। रक्षानिर्यातप्रसङ्गेऽपि मन्त्रिणा निगदितं यत् रक्षानिर्यातेन साम्प्रतं

एकविंशतिसहस्रकोटिरूप्यकाणि अधिगतानि। राजनाथसिंहेन भारतामेरिकादेशयो: आपूर्ति-व्यवस्थाया: सुरक्षापत्रेषु सम्पर्काधिकारिणां नियुक्तिसम्बन्धेऽपि एकं सहभागित्व-ज्ञापनपत्रे हस्ताक्षरं कृतम्।

**अमित शाह - छत्तीसगढ़**

केन्द्रीय गृहमन्त्री अमितशाहः गतरात्रौ छत्तीसगढस्य त्रिदिवसीययात्रायाः कृते रायपुरम् सम्प्राप्तवान्। सः अद्य नक्सलविरोधीअभियानेषु विभिन्नसभायाः अध्यक्षतां करिष्यति। श्री शाहः अद्य प्रातः रायपुरमण्डलस्य चम्पारणनगरस्य महाप्रभुवल्लभाचार्यस्य आश्रमस्य भ्रमणम् अपि करिष्यति। पश्चात् सः छत्तीसगढस्य, समीपस्थराज्यानां मुख्यसचिवानां, आरक्षीमहानिदेशकानां च अन्ताराज्यसमन्वयविषये आयोजिताया: सभायाः अध्यक्षतां करिष्यति। ततः सः राज्यस्य वामपक्षीय-उग्रवादेन प्रभावितेषु क्षेत्रेषु सुरक्षाविकासयोः विषये आयोजिते कार्यक्रमे अपि भागं भजिष्यति।